॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ५४

तथोक्ते तानृषीन्रामः प्रत्युवाच कृताञ्जलिः ।
किमाहारः किमाचारो लवणः क्व च वर्तते ॥१॥

राघवस्य वचः श्रुत्वा ऋषयः सर्व एव ते ।
ततो निवेदयामासुर्लवणो ववृधे यथा ॥२॥

आहारः सर्वसत्त्वानि विशेषेण च तापसाः ।
आचारो रौद्रता नित्यं वासो मधुवने सदा ॥३॥

हत्वा दशसहस्राणि सिंहव्याघ्रमृगद्विपान् ।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम् ॥४॥

ततोऽपराणि सत्त्वानि खादते स महाबलः ।
संहारे समनुप्राप्ते व्यादितास्य इवान्तकः ॥५॥

तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन् ।
घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम् ॥६॥

तथा तेषां प्रतिज्ञाय मुनीनामुग्रतेजसाम् ।
स भ्रातॄन्सहितान्सर्वानुवाच रघुनन्दनः ॥७॥

को हन्ता लवणं वीराः कस्यांशः स विधीयताम् ।
भरतस्य महाबाहोः शत्रुघ्नस्याथवा पुनः ॥८॥

राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत् ।
अहमेनं बधिष्यामि ममांशः स विधीयताम् ॥९॥

भरतस्य वचः श्रुत्वा शौर्यवीर्यसमन्वितम् ।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम् ॥१०॥

शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम् ।
कृतकर्मा महाबाहुर्मध्यमो रघुनन्दनः ॥११॥

आर्येण हि पुरा शून्या अयोध्या रक्षिता पुरी ।
सन्तापं हृदये कृत्वा आर्यस्यागमनं प्रति ॥१२॥

दुःखानि च बहूनीह अनुभूतानि पार्थिव ।
शयानो दुःखशय्यासु नन्दिग्रामे महात्मना ॥१३॥

फलमूलाशनो भूत्वा जटाचीरधरस्तथा ।
अनुभूयेदृशं दुःखमेष राघवनन्दनः ।
प्रेष्ये मयि स्थिते राजन्न भूयः क्लेशमाप्नुयात् ॥१४॥

तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् ।
एवं भवतु काकुत्स्थ क्रियतां मम शासनम् ॥१५॥

राज्ये त्वामभिषेक्ष्यामि मधोस्तु नगरे शुभे ।
निवेशय महाबाहो भरतं यद्यवेक्षसे ॥१६॥

शूरस्त्वं कृतविद्यश्च समर्थः संनिवेशने ।
नगरं मधुना जुष्टं तथा जनपदाञ्शुभान् ॥१७॥

यो हि वंशं समुत्पाट्य पार्थिवस्य पुनः क्षये ।
न विधत्ते नृपं तत्र नरकं स निगच्छति ॥१८॥

स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम् ।
राज्यं प्रशाधि धर्मेण वाक्यं मे यद्यवेक्षसे ॥१९॥

उत्तरं च न वक्तव्यं शूर वाक्यान्तरे मम ।
बालेन पूर्वजस्याज्ञा कर्तव्या नात्र संशयः ॥२०॥

अभिषेकं च काकुत्स्थ प्रतीच्छस्व मयोद्यतम् ।
वसिष्ठप्रमुखैर्विप्रैर्विधिमन्त्रपुरस्कृतम् ॥२१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com